स्कन्धोपनेयं तं प्राहुः सन्धिं सन्धिविच-
क्षणाः ॥१६॥
परस्परोपकारस्तु मैत्रीसम्बन्धकस्तथा ।
उपहारश्च विज्ञेयाश्चत्वारश्चैव सन्धयः ॥”
इति विष्णुशर्म्मकृतहितोपदेशे सन्धिर्नाम चतुर्थ-
कथासंग्रहः ॥ संयोगः । तत्पर्य्यायः । श्लेषः २ ।
इत्यमरभरतौ ॥ (यथा, मनुः । ८ । २४८ ।
“तड़ागान्युदपानानि वाप्यः प्रस्रवणानि च ।
सीमासन्धिषु कार्य्याणि देवतायतनानि च ॥”)
सुरङ्गा । भगम् । सङ्घटनम् । रूपकाणां
मुखाद्यङ्गम् । सावकाशः । इति मेदिनी ॥ भेदः ।
इति विश्वः ॥ (साधनम् । यथा, रघुः ।१८।१६।
“तस्य सावरणदृष्टसन्धयः
काम्यवस्तुषु नरेषु सङ्गिनः ।
वल्लभाभिरुपसृत्य चक्रिरे
सामिभुक्तविषयाः समागमाः ॥”)
व्याकरणमते वर्णद्वयस्य मेलनम् । (यथा,
कथासरित्सागरे । ६ । ११३—११७ ।
“अथैका तस्य महिषी राज्ञः स्तनभरालसा ।
शिरीषसुकुमाराङ्गी क्रीड़न्ती क्रममभ्यगात् ॥
सा जलैरभिषिञ्चन्तं राजानमसहा सती ।
अब्रवीन्मोदकैर्देव परिताड़य मामिति ॥
तच्छ्रुत्वा मोदकान् राजा द्रुतमानाययद् बहून्
ततो विहस्य सा राज्ञी पुनरेवमभाषत ॥
राजन्नवसरः कोऽत्र मोदकानां जलान्तरे ।
उदकैः सिञ्च मा त्वं मामित्युक्तं हि मया तव ॥
सन्धिमात्रं न जानासि माशब्दोदकशब्दयोः ।
न च प्रकरणं वेत्सि मूर्खस्त्वं कथमीदृशः ॥”)
तस्य लक्षणादिर्यथा । अर्द्धमात्रोच्चारणकालेना-
व्यवहितयोर्व्वर्णयोर्द्रुततरोच्चारणं सन्धिः । अत
एव श्लोकार्द्धयोर्मन्त्रार्द्धयोर्व्वा न सन्धिः । तत्र
अर्द्धमात्रोच्चारणकालव्यवधानस्योचितत्वादिति
प्राञ्चः । स्वमते तु सन्ध्यध्यायसूत्रविहितकार्य्यं
सन्धिरिति सन्धिलक्षणम् । तेन पिपच्चादि-
शब्दानां संयोगान्तलुपि लुपि न सन्ध्याद्यविधौ
इति निषेधेऽपि सन्धिग्रहणात् सन्धिलुप्येव न
सन्धिरिति नियमात् भपभसोरित्यनेन चप-
अपौ पिपक् पिपग् इति । भिन्नपदे तु सन्धि-
र्व्विभाषयेति बोध्यम् । तथा च ।
“सन्धिरेकपदे नित्यो नित्यो धातूपसर्गयोः ।
सूत्रेषु च भवेन्नित्यः सैवान्यत्र विभाषया ॥”
इति प्राञ्चः ।
एकपदे इति स्वभावादेकपदे समासेऽपि ।
यथादानं भवेत् नद्यौ इत्यादि । समासे सुरारिः
हृषीकेशः त्र्यम्बकः गवीशः इत्यादि । धातू-
पसर्गयोस्तु अधीते उपेत्य इत्यादि । अन्यत्र
अत्र अम्भः अत्राम्भः इह इन्दुः इहेन्दुः
इत्यादि । धातूपसर्गयोः समासस्य नित्यत्वादेक-
पदग्रहणेनैवेष्टसिद्धौ तयोः पुनरुपादानं अनित्य-
समासे कदाचिदेकपदेऽपि सन्धिर्विभाष्यते इति
ज्ञापनार्थम् । तेन उच्चारितकश्चिदृचां चान-
नानां चतुर्णां इत्यादि सिद्धिः । इति मुग्ध-
बोधव्याकरणटीकायां दुर्गादासः ॥*॥ सर्व्वा-
ङ्गुरसन्धिर्म्मासत्रयेण भवति । मात्रसन्धिः सप्त-
मासैर्भवति । इति सुखबोधः ॥ युगसन्धिर्युग-
शब्दे देहसन्धिर्म्मर्म्मशब्दे च द्रष्टव्यः ॥

सन्धिका, स्त्री, (सन्धा एव । स्वार्थे कन् ।) मद्य-
सन्धानम् । इति शब्दरत्नावली ॥

सन्धिचौरः, पुं, (सन्धिकृत् सुरङ्गाकारी चौरः ।
सन्धिना चौर इति वा ।) चौरविशेषः ।
सिंधाल चोर इति भाषा । यथा । सन्धिचौरस्तु
हारकः । इति शब्दमाला ॥

सन्धिजं, क्ली, (सन्धेर्जायते यदिति । जन + डः ।)
आसवादि । यथा, काशीखण्डे ।
“कार्त्तिके वर्ज्जयेत्तैलं कार्त्तिके वर्ज्जयेन्मधु ।
कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके मासि सन्धि-
जम् ॥”
सन्धिजमासवादि । इति तिथ्यादितत्त्वम् ॥
(सन्धिसमुत्पन्ने, त्रि । यथा, सुश्रुते । ६ । २ ।
“पक्वः शोफः सन्धिजः संस्रवेद्यः
सान्द्रं पूयं पूति पूयालसः सः ॥”)

सन्धिजीवकः, त्रि, (सन्धिना अभिसन्धिना जीव-
तीति । जीव + ण्वुल् ।) कुकृत्या विभवान्वेषी ।
तत्पर्य्यायः । पार्श्वकः २ । इति त्रिकाण्डशेषः ।

सन्धितः, त्रि, (सन्धा जातास्येति । सन्धा +
इतच् ।) सन्धियुक्तः । मिलितः । यथा,—
“अस्मद्दराह्विव्यवपुः सन्धितः सन्धिमानसौ ।
आर्य्यत्वादार्य्यराजाख्यः ख्यातो भुवि भवि-
ष्यति ॥”
इति राजतरङ्गिण्याम् २ तरङ्गः ॥
आसवादि । यथा,—
“कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके शुक्तसन्धि-
तम् ।”
इति श्रीहरिभक्तिविलासे १६ विलासः ॥
शुक्तं काञ्जिकादिपर्य्युषितद्रव्यं सन्धितञ्च वर्ज्ज-
येत् । इति तट्टीका ॥

सन्धिनी, स्त्री, (सन्धास्त्यस्या इति । इनिः ।
ङीप् ।) वृषभेणाक्रान्ता गौः । इत्यमरः ॥ या
ऋतुमती वृषभेण आक्रान्ता निष्पादितमैथुना
सा सन्धिनी । गर्भेण सन्धानं सन्धा सा विद्यते
अस्याः सन्धिनी इन् । इति भरतः ॥ अकाल-
दुग्धा गौः । इति मेदिनी शब्दरत्नावली च ॥
(यथा, याज्ञवल्क्यः । १ । १७० ।
“सन्धिन्यनिर्दशावत्सागोपयः परिवर्ज्जयेत् ॥”)

सन्धिपूजा, स्त्री, (सन्धौ अष्टमीनवमीसन्धिक्षणे
पूजा ।) शारदीयमहापूजान्तर्गततृतीया
पूजा । यथा कालिकापुराणवचनान्तरम् ।
“अष्टमीनवमीसन्धौ तृतीया खलु कथ्यते ।
तत्र पूज्या त्वहं पुत्र योगिनीगणसंयुता ॥”
ज्योतिषे ।
“अष्टम्यां सन्धियोगे सकलपरिजनैः पूजयेत्
सत्त्वभावे, ।”
सप्तमीपूजावत्महाष्टम्यादिकृत्यमपि षष्टिद-
ण्डात्मिकायामेव न तु परदिवसीयखण्डतिथौ
किन्तु पूर्व्वोक्तसन्ध्यनुरोधान्निशादाविव खण्ड-
तिथावपि सन्धिपूजा । एवञ्च पूर्णाष्टम्यां महा-
ष्टमीपूजा तत्परदिने अष्टमीनवम्योः सन्धिपूजा
तत्परदिने महानवमीपूजा प्रागुक्तनन्दिकेश्वर-
पुराणाद्युक्तोदयगामितिथ्यनुरोधात् । तत्पर-
दिने दशम्यां विसर्जनं पूजानुरोधेनाधिकदिन-
लाभात् । अन्यत् दुर्गाशब्दे द्रष्टव्यम् ॥

सन्धिबन्धः, पुं, (सन्धिं बध्नातीति । बन्ध +
अच् ।) भूमिचम्पकः । इति शब्दचन्द्रिका ॥

सन्धिबन्धनं, क्ली, (सन्धेर्बन्धनं यस्मात् ।) शिरा ।
इति केचित् ॥

सन्धिमतिः, पुं, काश्मीरदेशीयजयेन्द्रराजमन्त्री ।
स च परं राजा बभूव । यथा,—
“सुतो महीमहेन्द्रस्य जयेन्द्रस्तस्य भूपतेः ।
क्षामाजानुभुजो राजा बभौजाथ प्रथुप्रथः ॥
तस्याभूदङ्गतोदन्तभवभक्तिविभूषितः ।
राज्ञः सन्धिमतिर्नाम मन्त्री मतिमतां वरः ॥
अस्मद्दराह्विव्यवपुः सन्धितः सन्धिमानसौ ।
आर्य्यत्वादार्य्यराजाख्यः ख्यातो भुवि भवि-
ष्यति ॥”
इति राजतरङ्गिण्याम् २ तरङ्गः ॥

सन्धिरन्ध्रका, स्त्री, (सन्धिरन्ध्रेण कायतीति ।
कै + कः । टाप् ।) सुरङ्गा । इति केचित् ॥

सन्धिला, स्त्री, (सन्धिं लातीति । ला + कः ।)
सुरङ्गा । नदी । मदिरा । इति मेदिनी ॥

सन्धिवेला, स्त्री, (सन्धिरूपा वेला ।) काल-
विशेषः । स तु अहोरात्रादिमिलनकालरूपः ।
यथा । व्यासः ।
“उपास्ते सन्धिवेलायां निशाया दिवसस्य च ।
तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः ॥”
इत्याह्निकतत्त्वम् ॥

सन्धिहारकः, पुं, (सन्धिना हरतीति । हृ +
ण्वुल् ।) सन्धिचौरः । यथा,—
“वन्दिचौरो माचलः स्यात् कुम्भिलः सन्धि-
हारकः ।”
इति हारावली ॥

सन्ध्या, स्त्री, (सं सम्यक् ध्यायत्यस्यामिति सं +
ध्यै चिन्तने + “आतश्चोपसर्गे । इत्यङ् । यद्वा,
सन्दधातीति । सं + धा + “अघ्न्यादयश्च ।”
उणा० ४ । ११२ । इति यक्प्रत्ययेन निपा-
तितः ।) कालविशेषः । स तु दिवारात्रि-
सम्बन्धिदण्डद्वयरूपः । तत्पर्य्यायः । पितृप्रसूः २ ।
इत्यमरः ॥ सन्धा ३ द्विजमैत्री ४ । इति भरत-
धृतवाचस्पतिः । सायम् ५ दिनान्तम् ६
निशादि ७ दिवसात्ययम् ८ । इति राज-
निर्घण्टः ॥ सायाह्नः ९ विकालः १० ब्रह्म-
भूतिः ११ सायः १२ । इति शब्दरत्नावली ॥
सा च कालस्य भार्य्या । यथा,—
“कालस्य तिस्रो भार्य्याश्च सन्ध्यारात्रिदिनानि च
याभिर्विना विधाता च संख्यां कर्त्तुं न शक्यते ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः ॥ * ॥
रात्रेराद्यन्तदण्डचतुष्टयात्मककालः । यथा,—